[1]तृम्फन्-न्ती-ती, [2]तृम्फयन्-न्ती, तितृम्फिषन्-न्ती ; —
तृम्फिष्यन्-न्ती-ती, तृम्फयिष्यन्-न्ती-ती, तितृम्फिषिष्यन्-न्ती-ती ;
[3]व्यतितृम्फमाणः, — — तरीतृफ्यमाणः ;
व्यतितृम्फिष्यमाणः, — — तरीतृफिष्यमाणः ;
[4]सन्तृप्-सन्तृब्-सन्तृफौ-सन्तृफः ; — —
[5]तृफितम्-तः, तृम्फितः, तितृम्फिषितः, तरीतृफितः-तवान् ;
तृम्फः, तृम्फः, तितृम्फिषुः, [6]तरीतृम्फः ;
तृम्फितव्यम्, तृम्फयितव्यम्, तितृम्फिषितव्यम्, तरीतृफितव्यम् ;
तृम्फणीयम्, तृम्फणीयम्, तितृम्फिषणीयम्, तरीतृफणीयम् ;
तृम्फ्यम्, तृम्फ्यम्, तितृम्फिष्यम्, तरीतृफ्यम् ;
ईषत्तृम्फः-दुस्तृम्फः-सुतृम्फः ; — — —
[7]तृफ्यमाणः, तृम्फ्यमाणः, तितृम्फिष्यमाणः, तरीतृफ्यमाणः ;
[A]तृम्फः, तृम्फः, तितृम्फिषः, तरीतृफः ;
तृम्फितुम्, तृम्फयितुम्, तितृम्फिषितुम्, तरीतृफितुम् ;
[8]तृम्फा, तृम्फणा, तितृम्फिषा, तरीतृफा ;

---

1. 'तुदादिभ्यः—' (3-1-77) इति शः विकरणप्रत्ययः। शस्य सार्वधातुकत्वेन ङिद्वद्भावात्, 'अनिदितां—' (6-4-24) इत्युपधानकारलोपः। 'शे तृम्फादीनामिति वक्तव्यम्' (वा. 7-1-59) इति नुम्। तृम्फादयः=येऽत्र (तुदादौ) सानुषङ्गाः पठ्यन्ते ते इति व्याख्यातारः। 'प्रकारवाची आदिशब्दः। प्रकारश्च सादृश्यम्। तच्च नकारानुषक्ततया—' इति हरदत्तः।
2. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इत्यनेन ण्यन्तात् परस्मैपदमेव। न शानच्।
3. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच्।
4. क्विपि, 'अनिदिताम्—' (6-4-24) इति नकारलोपे, चर्त्वजश्त्वयो रूपम्।
5. निष्ठायाम्, नकारलोपे रूपम्।
6. यङन्तात् पचाद्यचि, 'यङोऽचि च' (2-4-74) इति यङो लुकि रूपम्। लुका लुप्तत्वेन स्थानिवद्भावनिषेधादुपधानकारलोपो न।
7. यकि, उपधानकारलोपे, 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति णत्वम्।
8. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादावकारप्रत्ययः।
A. 'शत्रूल्लोभकरैर्फरीढितृपिता तृम्फाय तोपार्थिनो
राज्ञो नित्यमतुम्पकान् वितुफती बन्धूंश्च सन्तुम्फती।' धा. का. 2.74.